मनुः । ५स्वदङ्गादिवार्थे न० । [वकावनम्रा” कुमा० ।

**अवनम्र** त्रि० अव+नम–र । अतिशयनम्रे “पर्य्याप्तपुष्पस्त-

**अवनय** पु० अव+नी–भावे अच् । १अधःपातने २निपातने ।

**अवनयन** न० अव+नी–ल्युट् । अवस्थापने । “अवनयनावस्तरणे चावटवत्” कात्या० ८।५।२४ । “गर्त्तेषु प्रोक्षणशेषोदकसेचनम्” वेददी० तेन ३तदर्थेऽपि ।

**अवनाट** त्रि० अवनता नासिका प्रा०स० नतार्थे नासिकाया- नाटादेशः अर्श आद्यच् । (खांदा) अवनतनासिके जने ।

**अवनाय** पु० अव+नी “अवोदोर्नियः” पा० अचोबाधकः घञ् । १अधोनयने अधःप्रापणे । [नतौ ।

**अवनाम** पु० अव+नम–घञ् । अवनतौ अधोभूत्वा नतायां

**अवनि** (नी) स्त्री अव–अनि । भूमौ । “सुसाधितायामवनौ” इति स्मृ०सि० । वा ङीप् अवनीत्यपि । “दीनदयालुतयाऽवनिपाल” “सुसमृद्धवनी ह्यथाऽवनी हुवनी संप्रवदत्पिकापि का इति च नैष० । करणे अनि । २अङ्गुलीषु ब०व० निरु० । अव प्रीणने कर्त्तरि अनि । ३नद्यां निरु०“सं यं स्तुभोऽवनयः न यन्ति समुद्रं स्रवतोरोधचक्राः” ऋ० १,१९०,७ । दीर्घान्तः ४तायमाणलतायां राजनि० ।

**अवनिक्त** त्रि० अव+निज–क्त । १क्षालिते २शोधिते च ।

**अवनि(नी)नाथ** पु० ६त० । नृपे भूपतौ अवनी(नि) नाथकादयोऽप्यत्र ।

**अवनि(नी)पति** ६त० । नृपे अवनिस्वाम्यादयोऽप्यत्र । “पतिरवनीपतीनां तैश्चकाशे चतुर्भिः” रघुः ।

**अव(नि)नीपाल** ६त० । नृपे “इत्यमसु विलपन्नमसुञ्चद्दीनदयालुतयावनिपालः नैष० । “कतिचिदवनिपालः शर्व्वरीः शर्वकल्पः” रघुः ।

**अवनीश** पु० ६त० । भूपतौ भूमीश्वरे अवनीश्वरादयोऽप्यत्र ।

**अवनेजन** न० अव+निज–ल्युट् ।१प्रक्षालने “न कुर्य्याद्गुरु पुत्रस्य पादयोश्चावनेजनम्” मनुः । श्राद्धे पिण्डदानार्थं मातृतकुशस्य जलेन सेकरूपे २संस्कारभेदे च । “दक्षिणास्थितप्रागग्रकुशमूलमध्याग्रेषु मातादिभ्यस्तदुत्तरं मध्यस्थितप्रागग्रकुशमूलमध्याग्रेषु पितादिभ्यस्तदुत्तरं स्थित प्रागग्रकुशमूलमध्याग्रेषु मातामहादिभ्यः प्राङ्मुखेनावनेजनं कर्त्तव्यम्” तत्त्वप्रदीपः । रघुनन्दनेन मात्रपक्षोनाद्दत इति भेदः ।

**अवन्ति** पु० अव–झि । मालवदेशे । स च वृ०स० कूर्म्मचक्रविभागे “अथ दक्षिणेन लङ्केत्युपक्रम्य “आकर्वणावन्तिकदशपुरगोनर्द्दा” इति उक्तः दक्षिणदेशस्थः । तत्र शिप्रा नदी महाकालनामा शिवमूर्त्तिविशेषः उज्जयिनी राजधानी । तत्पुरीपरत्वे स्त्री वा ङीप् । “अवन्तिनाथोऽयमुदग्रबाहुरित्युपक्रम्य “असौ महाकालनिकेतनस्य वसन्नदूरे किल चन्द्रमौलेः” । “अनेन यूना सह पार्थिवेन शिप्रातरङ्गानिलकम्पितासु विहर्त्तुम् ? च रघौ तथावर्णितम् । ज्योतिर्वि० विक्रमन्टपवर्णने “यद्राजधान्युज्जयिनी महापुरी सदा महाकालमहेशयोगिनी । समाश्रिता प्राग्यपवर्गदायिनी श्रीविक्रमार्कोऽवनिपो जयत्यपि” तस्मिन् सदा विक्रममेदिनीशे विराजमाने समवन्तिकायाम् । सर्व्वप्रजामण्डलसौख्यसम्पद्बभूव सर्व्वत्र च वेदकर्म्म” । तथाच अवन्ती उज्जयिनी च नामान्तरं यथोक्तं सि०शि० । “यथोज्जयिन्याः कुचतुर्थभागे प्राच्यां दिशि स्याद्यमकोटिरेव । ततश्च पश्चान्न भवेदवन्ती लङ्कैव तस्याः ककुभि प्रतीच्याम्” । इयञ्च लङ्कास्थानात् सूचत्तषोड़शांशे मेरुपर्य्यन्तगतरेखायां समसूत्रस्थाने स्थिता यथोक्तं तत्रैव । “निरक्षदेशात् क्षितिषोड़शांशे भवेदवन्ती गणितेन यस्मात् । तदन्तरं षोड़शसंगुणं स्याद्भूमानमस्मात् बहु किं तदुक्तम्” । इं लण्डीयमानचित्रवेदिनस्तु समसूत्रस्थानात् किञ्चिदन्तरपश्चिमस्थेति वर्णयन्ति । इयञ्च मोक्षपुरी “अयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः” । पुरा० । भा० उ०प०जम्बुखण्डविभागे जनपदगणनायाम् “कुन्तयोऽवन्तयश्चैव तथैवापरकुन्तयः” इति उक्तेरस्य जनपदवाचितया इदन्तत्वाच्च ततो भवादौ ञ्य । आवन्त्यः तद्भवादौ त्रि० । बहुषु च तद्राजनि ञ्यस्य लुक् । अवन्तयः तद्देशवासिषु ब०व० । तद्देशन्टपे च । स्वार्थे कन् अवन्तीनगर्य्याम् “काशीकाञ्ची अवन्तिका” पुरा० ।

**अवन्तीपुर** न० अवन्तिः पूः अच् समा० । अवन्तिनगरे उज्जयिन्याम् । [अवन्तिस्थे ब्राह्मणे ।

**अव(न्ति)न्तीब्रह्म** पु० अवन्तिषु ब्रह्मा अच् समा० ।

**अव(न्ति)न्तीसोम** पु० अवन्तिषु सोम इव । काञ्जिके ।

**अवपन्न** त्रि० अव+पद–क्त । १सन्दृष्टे २सङ्कपके च “केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः” मनुः । “अवपन्नं संसर्गदूषितम्” कुल्लू० । “केशकीटावपन्नं च स्त्रीभिःस्पृष्टं तथैव च” हारी० अवपन्नं सङ्कपकम् प्रा०त०रघु० ।

**अवपाक** पु०अव+अपकर्षे पच–घञ् । १अपकृष्टपाके । कर्म्मणि